ॐ
श्रीरामजयम्
ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः

# ॥ श्रीज्ञानलक्ष्मीस्तोत्रम् ॥

श्रीरूपा श्रीमहालक्ष्मीश्श्रीकर्या शुभगीतिका।
विद्यासंपत्प्रसादा मा सुज्ञानशुभलक्षिता॥ १॥

नित्या नित्यसुगेया मा नित्यानन्दप्रभासिनी।
नित्यैकवस्तुसद्रूपा नित्यत्ववरदायिनी॥ २॥

सर्वसंपूर्णसुप्राणा सर्वजीवनजीवनी।
सर्वमङ्गलसंदात्री सर्वा सुमङ्गला जनी॥ ३॥

सुज्ञानरससंभासा सत्त्वसुज्ञानरूपिणी।
प्रज्ञानवसुदात्री श्रीर्ज्ञानश्वेतसरस्वती॥ ४॥

भक्तिपुष्पार्चिता माता हृन्नालीकसुवासिनी।
भक्तिदीपस्फुरद्रूपा मनोनैर्मल्यपूजिता॥ ५॥

त्यागराजगुरुस्वामिशिष्यापुष्पानमस्कृता।
गुरुदेवकृपास्फोटामोदश्लोकसुमार्चिता॥ ६॥

मङ्गलं मोक्षरूपायै श्रीदेव्यै शुभमङ्गलम्।
मङ्गलं मनआभायै महालक्ष्म्यै सुमङ्गलम्॥ ७॥

बालालापमिदं स्तोत्रं ज्ञानलक्ष्मीप्रियं भगम्।
पठनं गायनं भक्त्या ज्ञानलक्ष्मीकृपावहं॥ ८॥

ॐ
शुभमस्तु